# Pundarikambarishakritam Purushottama Stotram

# पुण्डरीकाम्बरीषकृतं पुरुषोत्तमस्तोत्रम् ४

## Document Information

Text title : Pundarikambarishakritam Purushottama Stotram

File name : puNDarIkAmbarIShakRRitaMpuruShottamastotram04.itx

Category : vishhnu, vishnu, lakShmInArAyaNIyasaMhitA, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 1 | adhyAya 583/33-47||

Latest update : February 5, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 5, 2026

*sanskritdocuments.org*

# पुण्डरीकाम्बरीषकृतं पुरुषोत्तमस्तोत्रम् ४

त्रिः परिक्रम्य तं कृष्णनारायणं कृताञ्जली ।
तुष्टुवाते मुहुस्तौ च हृदयस्थं दृशोश्वरम् ॥ ३३॥

आवां कामार्थलुब्धौ च पापमात्राभिचारिणौ ।
ऋषीणां कृपया चात्र शरणं ते ह्युपागतौ ॥ ३४॥

अनुकम्पय नौ नाथ सुदीनौ शरणागतौ ।
मूढौ दुष्कृतकर्माणौ पतितौ भवसागरे ॥ ३५॥

कोऽन्यस्त्वत्सदृशो बन्धुर्महाभयनिवारकः ।
स्वार्थशून्यः परार्थैकध्येयोऽनाथपतिः प्रभुः ॥ ३६॥

नारायणेति त्वन्नाम चतुर्वर्गैकसाधनम् ।
"ॐ नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा" ॥ ३७॥

मन्त्रस्ते मोक्षदश्चातिपापिनां पावकोऽस्ति हि ।
जप्तो भवान् परं पारं प्रापयत्येव तेन हि ॥ ३८॥

तन्नौ प्रसीद देवेश दृढां भक्तिं प्रदेहि नौ ।
घोराद्दुस्तरखाताच्च समुत्तारय केशव ॥ ३९॥

इन्द्रियाणि मनो बुद्धिस्तव मूर्तौ वसन्तु नः ।
आत्मा संस्कारसहितश्चार्पितस्तव पादयोः ॥ ४०॥

प्रसीद देव सर्वात्मन्नसङ्ख्येयशिरोभुज ।
असङ्ख्यघ्राणनयनपाणिपाद नमोऽस्तु ते ॥ ४१॥

षड्विंशस्त्वं चान्तरात्मन् निष्प्रपञ्चः प्रवर्तसे ।
चतुष्पुमर्थमूर्तिस्त्वं जगन्नाथ नमोऽस्तु ते ॥ ४२॥

त्वदाराधनया कृष्ण भवन्ति सर्वसिद्धयः ।
योगाभ्यासं विना चास्मै कृष्णाय ते नमो नमः ॥ ४३॥

भक्तिं दृढां प्रदेह्यावां नास्त्यन्यत्प्रार्थनीयकम् ।
यावत्प्राणान्धारयावस्तावद्भक्तिर्दृढा त्वयि ॥ ४४॥

ततः पारेऽपि ते भक्तिं देहि नारायणप्रभो ।
अगाधभवपङ्केऽत्र निमग्नयोः परायणम् ॥ ४५॥

दास्यं नाथ सदा देहि चानुकम्पय नौ विभो ।
इति स्तुवन्तौ तौ भक्तौ पेततुर्दण्डवत् क्षितौ ॥ ४६॥

प्रसीदेति वदन्तौ च मुहुश्चक्रतुर्दर्शनम् ।
दिव्यदृष्ट्या विलोक्यैवं नेमतुश्च मुहुर्मुहुः ॥ ४७॥

इति श्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने ५८३-अध्यायान्तर्गतं पुण्डरीक-अम्बरीषकृतं पुरुषोत्तमस्तोत्रं सम्पूर्णम् ।

लक्ष्मीनारायणीयसंहिता । खण्ड १। अध्याय ५८३/३३-४७॥

lakShmInArAyaNIyasaMhitA . khaNDa 1. adhyAya 583/33-47..

Proofread by PSA Easwaran

*Pundarikambarishakritam Purushottama Stotram*

pdf was typeset on February 5, 2026

Please send corrections to *sanskrit@cheerful.com*